No of Questions : 30　　　　　　नामांक

No of Pages : 6

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

# माध्यमिक परीक्षा, 2019

# तृतीय भाषा–संस्कृतम्

# मॉडल पेपर द्वितीय

**समय : 3.15 घण्टे**　　　　**पूर्णांक : 80**

**परीक्षार्थियों के लिए के लिये सामान्य निर्देश :–**

1. परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रे निर्धारितस्थाने नामांकः अनिवार्यतो लेखनीयः।
2. सर्वे प्रश्नाः अनिवार्याः।
3. सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेखनीयानि।
4. एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्र एव लेखनीयानि।
5. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृत–माध्यमेन एव लेखनीयानि।

---

**1.** अधोलिखितस्य गद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु–　5

प्रतापस्य चिन्तां विभाव्य 'भामाशाह' नामा कश्चित् श्रेष्ठी किमपि महत्कार्यं कर्तुं कालः समायातः इति भावितवान्। सः प्रतापं निकषा गत्वा उवाच– "प्रभो! अहं भवद्वंशस्य सेवकः, मम हस्ते प्रभूतं धनं विद्यते। तेन भवान् पञ्चविंशतिसहस्रसैनिकान् द्वादशवर्षपर्यन्तं पालयितुं प्रभविष्यति" इति। तदा प्रतापः उवाच– "अहं नैतद्धनं स्वीकर्तुं शक्नोमि, एतद् धनं भवता अर्जितमस्ति।" तदा भामाशाहः प्रावोचत्– "नैतद्धनं परकीयम्। देशरक्षार्थं मया अर्जितमिदं धनं यदि सहायकं भवेत् तर्हि मम जीवनं सार्थकं भविष्यति" इति। भामाशाहस्य वचनं श्रुत्वा प्रतापस्य मनः असीमसान्त्वनाम् आप्तवान्।

**अथवा**

**1.** अधोलिखितस्य गद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु–　5

तेन पुनः सैन्यशक्तिसंग्रहकार्यम् आरब्धम्, महासैन्यं स रचयामास। तया सेनया च मुगलशासनं प्रति स्वातन्त्र्ययुद्धं प्रारभत। स्वराज्यहस्तच्युतान् अनेकभागान् पुनः हस्तगतान् कृतवान्। तेषु मोही, गोगुन्दा, उदयपुरम् इत्यादयः मुख्याः आसन्। स्वराज्ये शान्तिं संस्थाप्य 'चावण्ड' नामकं स्थानं स्वराजधानीम् अकरोत्। तस्मिन् काले 'चावण्ड' स्थानं स्थापत्यकलायाः, ललितकलायाः, वाणिज्यस्य, विद्यायाश्च प्रमुखकेन्द्रम् आसीत्।

अन्ते असावधानतया पादे धनुष्–प्रत्यञ्चाघातेन प्रतापोऽस्वस्थोऽभवत्। 1597 तमे ईस्वीयाब्दे प्रतापः दिवंगतः। प्रतापः महान् सेनानायकः, जननायकः, व्यवस्थापकः, सङ्घटनकर्त्ता च आसीत्। भारतवासिनः अधुनापि तस्य स्वातन्त्र्यप्रेमिणः शौर्यगाथां गायन्ति।

**2.** अधोलिखितस्य पद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु–　5

आसीना भव मानस–हंसे
कुन्द–तुहिन–शशि–धवले!

हर जडतां कुरु बोधि–विकासं
सित–पंकज–तनु–विमले!

**अथवा**

2. अधोलिखितस्य पद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु– 5
हिमालयात् समारभ्य यावदिन्दुसरोवरम्।
तं देवनिर्मितं देशं हिन्दुस्थानं प्रचक्षते।।

3. अधोलिखितस्य पद्यांशस्य सप्रसंगं संस्कृतव्याख्यां करोतु– 4
उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।
वर्षं तद्भारतं नाम भारती यत्र सन्ततिः।।

**अथवा**

3. अधोलिखितस्य पद्यांशस्य सप्रसंगं संस्कृतव्याख्यां करोतु– 4
प्रियवाक्य–प्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्मात्तदेव वक्तव्यं वचने का दरिद्रता।।

4. अधोलिखितस्य नाट्यांशस्य सप्रसंगं संस्कृतव्याख्यां करोतु– 3
**राजा** – (सहर्षम् आत्मगतम्) कथमिव सम्पूर्णमपि मे मनोरथं नाभिनन्दामि? (इति बालं परिष्वजते।)
**बालः** – मुञ्च माम्। यावन्मातुः सकाशं गमिष्यामि।
**राजा** – पुत्रक, मया सहैव मातरमभिनन्दिष्यसि।
**बालः** – मम खलु तातो दुष्यन्तः। न त्वम्।
**राजा** – (सस्मितम्) एष विवाद एव प्रत्याययति।

**अथवा**

4. अधोलिखितस्य नाट्यांशस्य सप्रसंगं संस्कृतव्याख्यां करोतु– 3
**सर्वदारः** – (तथा निपुणं निरीक्षमाणः) महाराज! मेवाड़मन्त्री भामाशाहः इव कश्चन आगच्छन् प्रतीयते।
**प्रतापः** – हुँ, किम् उक्तम्! भामाशाहः? तस्य कथम् इदं ज्ञातम् अभूत्? अस्तु तावत्, प्रतीक्षामहे तम्। (भामाशाहः धनराशिग्रन्थिम् आदाय आयाति)
**भामाशाहः** – (प्रणम्य) अन्नदातः! सेवकं सन्त्यज्य क्व प्रस्थीयते श्रीमता?
**प्रतापः** – (दीर्घं निःश्वस्य) न क्व अपि बन्धो! गन्तुं शक्यम् अपि तु न। पार्श्वे धनं नैव, न च सेना एव। अहं स्वदेशं कथं रक्षेयम्? अस्माद् एव मनः दोलायितम् अस्ति।

5. अधोलिखितेषु प्रश्नेषु केषांचन षट् प्रश्नानामुत्तराणि संस्कृतमाध्यमेन लिखतु– 3
1. 'संघे शक्तिः' इति पाठः कस्मात् ग्रन्थात् गृहीतः?
2. अस्माभिः मनसा किं स्मरणीयम्?
3. शास्त्रचर्चा कदा प्रवर्तते?
4. सर्वदमनेन 'शकुन्तलावण्य' पदस्य किमर्थं गृहीतम्?
5. जले शवं पतितं दृष्ट्वा शृगालाः कस्मात् रुदन्ति?
6. 'लोकहितं मम करणीयम्' इति केन वदनीयम्?
7. परतन्त्र भारते कृषक–वर्गः कतिधा दासता–पञ्जरे आबद्धः आसीत्?

8. 'भारतवसुधाम्' इत्यस्य पञ्चविशेषणानि कानिचन लिख्यन्ताम्।

**निर्देशः प्रश्न संख्या 6–9 पर्यन्तं रेखांकितपदमाधृत्य प्रश्ननिर्माणं करोतु–**

**6.** ततः प्रविशति तपस्विनीभ्यां सह बालः। 1

**7.** हिमालयाद् समारभ्य इन्दुसरोवरं यावत्। 1

**8.** कपोतराजः तण्डुललुब्धान् कपोतान् प्रति आह। 1

**9.** अल्पानां वस्तूनाम अपि संहतिः कार्यसाधिका। 1

**10.** प्रश्नपत्रादतिरिच्य स्वपाठ्यपुस्तकात् श्लोकद्वयं लिखतु। 3

**11.** अधोलिखितं गद्यांशं पठित्वा एतदाधारित प्रश्नानाम् उत्तराणि यथानिर्देशं लिखतु–

अस्मिन् संसारे न कोऽपि देशो प्रान्तो वा विद्यते यत्रत्याः जनाः कालिदासं न विंदन्ति। भारतीयेषु कविषु, कालिदास एव भूयसी कीर्तिमलभत। आनन्दवर्धनाचार्यः कालिदासं महाकविमाह। प्रसन्नराघवस्य कर्त्ता जयदेवस्तं 'कविकुल गुरुः कालिदासो विलासः' अकथयत्। कविकुलगुरुर्महाकविकालिदासः संस्कृत–साहित्यस्य अद्यावधि कनिष्ठिकाधिष्ठितः कविरस्ति।

कालिदासविरचित–ग्रन्थेषु रघुवंश कुमारसंभवञ्चेति द्वे महाकाव्ये, मेघदूत ऋतुसंहारमिति खण्डकाव्यद्वयम्। मालविकाग्निमित्रं विक्रमोर्वशीयं अभिज्ञानशाकुन्तलादीनि त्रीणि नाटकानि। एषु ग्रन्थेषु रघुवंशमहाकाव्यं यथा चरित्र वर्णनदृष्ट्या गौरवान्वितं स्वीक्रियते, तथैव अभिज्ञानशाकुन्तलं नाम नाटकं समस्तेऽपि नाट्य साहित्ये सर्वोत्कृष्टं स्थानं लभते। कालिदासस्य समग्रसाहित्यं प्रसादगुणवैदर्भीरीत्या संवलितं वर्तते। उपमा क्षेत्रे तु कालिदासः अद्वितीयः कविरस्ति। संस्कृतसाहित्ये 'उपमा कालिदासस्य' इत्युक्तिः प्रसिद्धा वर्तते।

1. अस्य गद्यांशस्य समुचितं शीर्षकं लिखतु। 1
2. यथानिर्देशं प्रश्नान् उत्तरतु–
   (क) संस्कृतसाहित्यस्य कनिष्ठिकाधिष्ठित कविः कः? 1
   (ख) कस्मिन् क्षेत्रे कालिदासः अद्वितीयः कविरस्ति? 1
   (ग) कालिदासं महाकविं कः आह? 1
   (घ) 'कविकुलगुरुः कालिदासो विलासः' इति कः अकथयत्? 1
   (ङ) कालिदासविरचितखण्डकाव्यस्य नाम लिखत। 1
3. यथानिर्देशं प्रश्नान् उत्तरतु–
   (क) "यत्रत्याः जनाः कालिदासं न ..........।"अत्र समुचितं क्रियापदं किमस्ति?
   1
   (ख) 'द्वे महाकाव्ये'–इत्यत्र विशेषणपदं किम्? 1
   (ग) "कालिदास एव भूयसी कीर्तिमलभत।" अस्मिन् वाक्ये कर्तृपदं किम् प्रयुक्तम्? 1
   (घ) अस्मिन गद्यांशे 'द्वितीयः' पदस्य विलोमपदं किं प्रयुक्तम्? 1

**12.** अधोलिखितपदयोः सन्धिविच्छेदं कृत्वा सन्धेः नामापि लिखतु।

1. इत्यपि 1
2. हरये 1

**13.** अधोलिखितपदयोः सन्धिं कृत्वा सन्धेः नामापि लिखतु।

1. नदी + ईशः 1
2. सदा + एव 1



www.rbse.online

**14.** अधोलिखितरेखांकित पदेषु समस्तपदानां विग्रहम् अथवा विग्रहपदानां समासं कृत्वा समासस्य नामापि लिखतु–

1. अहं शक्तिम् अनतिक्रम्य परिश्रमं करोमि। 1
2. मह्यं नीलं कमलं रोचते। 1
3. पाणी च पादौ च शैत्येन रक्षणीयम्। 1

**15.** अधोलिखितरेखांकित पदेषु विभक्तिं तत् कारणं च लिखतु–

1. अध्यापकम् अभितः छात्राः तिष्ठन्ति। 1
2. सः मया सह गृहं गच्छति। 1
3. अध्यापकः छात्राय क्रुध्यति। 1

**16.** कोष्ठकेषु प्रदत्त–प्रकृतिप्रत्ययानुसारं शब्दनिर्माणं कृत्वा रिक्तस्थानानि पूरयित्वा लिखतु।

1. बालकः .......... पश्यति। (हस् + शतृ) 1
2. अस्माभिः सदाचारः ........... । (पाल् + अनीयर्) 1

**17.** अधोलिखितवाक्ययोः रेखांकितपदेषु प्रकृतिं प्रत्ययं च पृथककृत्वा लिखतु।

1. तेन कथा पठनीया। 1
2. सा तस्य आत्मजा अस्ति। 1

**18.** मंजूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा लिखतु–

| अपि, विना, मा, ह्यः |
|---|

1. छात्राः .......... वनभोजाय अगच्छन्। 1
2. धर्मेण .......... धनं न भवति। 1
3. असत्यं कदापि ........... वद। 1

**प्रश्नसंख्या 19–21 पर्यन्तं अधोलिखितवाक्यानां वाच्यपरिवर्तनं कृत्वा लिखतु–**

**19.** रामः पुस्तकं पठति। 1

**20.** अहं गृहं गच्छामि। 1

**21.** सः प्रतिदिनं पुस्तकं पठति। 1

**22.** घटिका चित्रसहायतया अंकानां स्थाने संस्कृतशब्देषु समयलेखनं करोतु–



1. अहं प्रातः ............ उत्तिष्ठामि। 1
2. अविनाशः ........... अल्पाहारं करोति। 1

**23.** अधोलिखितं वाक्यत्रयं शुद्धं कृत्वा लिखतु–

1. बालकाः पुस्तकं पठति। 1
2. अहं फलं खादामः। 1
3. सिंहः वने वसन्ति। 1

**24.** भवति आशा। भवत्याः राजकीय–आदर्श–उच्चमाध्यमिक–विद्यालये स्वच्छतादिवसः समायोजितः आसीत्। विषयेस्मिन् एक पत्रं स्वमित्रं प्रति लिखत। 4

**अथवा**

**24.** भवान् रमेशः। मातरं प्रति अधोलिखितं पत्रं मञ्जूषा–पद सहायतया पूरयत। 4

| **मञ्जूषा–** वार्षिकोत्सवः, अभिनयम्, मुख्यातिथिः, कुशलम्, अध्ययनम्, पितरम्, भवदीयः, सर्वेभ्यः |
|---|

चारूनगरात्

दिनांकः – 21.12.20....

पूजनीयाः मातृचरणाः!

नमोनमः। अत्र ........... तत्रास्तु। मम विद्यालये ........... आसीत्। तत्र अहम् एकम् ........... कृतवान्। मन्त्रिमहोदयः .......... रूपेण आगतवान्। मम .......... सम्यक् चलति। गृहे ........... नमोनमः। अहं .......... प्रणमामि।

................

रमेशः

**25.** मञ्जूषातः उचितानि पदानि चित्वा अधोलिखितं संवादं पूरयत। 4

| **मञ्जूषा–** कौ, मातः, पितामहः, भ्राता, जनकः, लवकुशौ, भीष्मः, पुत्रौ, अभिमन्युः। |
|---|

**पुत्री** – मातः, अभिमन्युः कः आसीत्?
**माता** – .......... अर्जुनस्य पुत्रः आसीत्।
**पुत्री** – ........... कः आसीत्?
**माता** – भीष्मः कौरवानां पाण्डवानां च .......... आसीत्।
**पुत्री** – पितामहः कः भवति?
**माता** – जनकस्य .......... पितामहः भवति।
**पुत्री** – .........., किम् श्री आर्यवीरः तव भ्राता?
**माता** – आम्, मम .......... तव मातुलः।
**पुत्री** – लवकुशौ रामस्य .......... आस्ताम्?
**माता** – .......... रामस्य .......... आस्ताम्।

**26.** अधोलिखितषड् वाक्येषु केषांचन चतुर्णां वाक्यानां संस्कृतभाषया अनुवादं करोतु– 4
1. वह दूध पीता है।
2. विनीत पुस्तक पढ़ता है।
3. हिरन वन में दौड़ते हैं।
4. मुनि वन में निवास करते हैं।
5. गाँव के दोनों ओर सड़क है।
6. वे दोनों बाग में खेलते हैं।

**27.** अधः चित्रं दृष्ट्वा मंजूषायां प्रदत्त शब्दानां सहायतया संस्कृते षड् वाक्यानि रचयतु– 3


www.rbse.online



| |
|---|
| **मञ्जूषा–** स्वस्य विद्यालये, सहयोगेनैव, स्वच्छताभियानं, प्रेरयन्ति, स्वच्छताकार्यम्, सार्वजनिकस्थलस्य। |

**अथवा**

**27.** अधोलिखितम् अनुच्छेदं मञ्जूषायाः सहायतया पूरयित्वा लिखतु– 3

| |
|---|
| **मञ्जूषा–** अध्यापकाः, उद्यानपालकः, विज्ञान–प्रयोगशालाः, योग्याः, भवनम्, पुस्तकालयः दिल्ली–नगरे, सुन्दराणि। |

मम विद्यालयः ........... अस्ति। विद्यालयस्य ........... विशालम्। अत्र द्वादश श्रेण्यः सन्ति। .......... छात्रान्। स्नेहेन पाठयन्ति। छात्राः अपि .......... सन्ति। विद्यालये विशालः ..........., विस्तृतम् क्रीडाक्षेत्रम्, नृत्य–संगीत–शाला .......... चापि सन्ति। विद्यालयस्य पुरतः रम्यम् उद्यानम् अस्ति। अत्र ........... पुष्पाणि विकसन्ति। ........... अत्र परिश्रमेण कार्यं करोति।

**28.** अधोलिखितवाक्यानि क्रमरहितानि सन्ति। यथाक्रमं संयोजनं कृत्वा लिखतु। 3

1. सः जलं पातुं स्नातुं च प्रतिदिनम् सरितः तटम् अगच्छत्।
2. एकदा सौचिकस्य पुत्रः गजस्य करे सूचिकाम् अभिनत्।
3. क्रुद्धः सन् गजः सरितः तटम् अगच्छत्। तत्र स्नात्वा जलं च पीत्वा स्वकरे पंकिलं जलम् आनयत्।
4. तदा सौचिकस्य पुत्रः आत्मग्लानिम् अनुभूय अति खिन्नः अभवत्।
5. सौचिकस्य आपणे स्यूतेषु वस्त्रेषु असिंचत्।
6. एकः गजः आसीत्।

□□□□□□□□

# राजस्थान बोर्ड परीक्षा 2019
# 10वीं कक्षा
# तृतीय भाषा–संस्कृतम्
# मॉडल पेपर द्वितीय

**समय : 3.15 घंटे** **(पूर्णांक : 80)**

**परीक्षार्थियों के लिये सामान्य निर्देश :–**

1. परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रे निर्धारितस्थाने नामांकः अनिवार्यतो लेखनीयः।
2. सर्वे प्रश्नाः अनिवार्याः।
3. सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेखनीयानि।
4. एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्र एव लेखनीयानि।
5. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृत–माध्यमेन एव लेखनीयानि।

**1.** अधोलिखितस्य गद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु– 5

प्रतापस्य चिन्तां विभाव्य 'भामाशाह' नामा कश्चित् श्रेष्ठी किमपि महत्कार्यं कर्तुं कालः समायातः इति भावितवान्। सः प्रतापं निकषा गत्वा उवाच– "प्रभो! अहं भवद्वंशस्य सेवकः, मम हस्ते प्रभूतं धनं विद्यते। तेन भवान् पञ्चविंशतिसहस्रसैनिकान् द्वादशवर्षपर्यन्तं पालयितुं प्रभविष्यति" इति। तदा प्रतापः उवाच– "अहं नैतद्धनं स्वीकर्तुं शक्नोमि, एतद् धनं भवता अर्जितमस्ति।" तदा भामाशाहः प्रावोचत्– "नैतद्धनं परकीयम्। देशरक्षार्थं मया अर्जितमिदं धनं यदि सहायकं भवेत् तर्हि मम जीवनं सार्थकं भविष्यति" इति। भामाशाहस्य वचनं श्रुत्वा प्रतापस्य मनः असीमसान्त्वनाम् आप्तवान्।

**उत्तरम् :**

**प्रसंग–** प्रस्तुत गद्यांश हमारी पाठ्य–पुस्तक 'स्पन्दना' के 'महाराणा प्रतापः' शीर्षक पाठ से उद्धृत किया गया है। इसमें देशभक्त एवं स्वतंत्रता–प्रिय महाराणा प्रताप के जीवन का परिचय दिया गया है। स्वतंत्रता के लिए संघर्ष करते हुए धनादि साधनों के अभाव में चिन्तित प्रताप के पास दानवीर एवं देशभक्त भामाशाह के आने का तथा उसके साथ महाराणा प्रताप के संवाद का इस अंश में वर्णन हुआ है।

**हिन्दी अनुवाद–** प्रताप की चिन्ता को जानकर 'भामाशाह' नामक किसी सेठ ने 'किसी महान् कार्य को करने के लिए समय आ गया है', ऐसा विचार किया। उसने प्रताप के निकट जाकर कहा– "हे प्रभु! मैं आपके वंश का सेवक हूँ, मेरे पास बहुत धन है। उससे आप पच्चीस हजार सैनिकों का बारह वर्षो तक पालन करने में समर्थ हो जाओगे।" तब प्रताप ने कहा– "मैं यह धन स्वीकार नहीं कर सकता हूँ, यह धन आपके द्वारा अर्जित किया हुआ है।" तब भामाशाह ने कहा– "यह धन दूसरे का नहीं है। देश की रक्षा के लिए मेरे द्वारा अर्जित यह धन यदि सहायक होगा तो मेरा जीवन सार्थक हो जायेगा।" भामाशाह के वचन सुनकर प्रताप के मन ने असीम सान्त्वना को प्राप्त किया।

**अथवा**

**1.** अधोलिखितस्य गद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु– 5

तेन पुनः सैन्यशक्तिसंग्रहकार्यम् आरब्धम्, महासैन्यं स रचयामास। तया सेनया च मुगलशासनं प्रति स्वातन्त्र्ययुद्धं प्रारभत। स्वराज्यहस्तच्युतान् अनेकभागान् पुनः हस्तगतान् कृतवान्। तेषु मोही, गोगुन्दा, उदयपुरम् इत्यादयः मुख्याः आसन्। स्वराज्ये शान्तिं संस्थाप्य 'चावण्ड' नामकं स्थानं स्वराजधानीम् अकरोत्। तस्मिन् काले 'चावण्ड' स्थानं स्थापत्यकलायाः, ललितकलायाः, वाणिज्यस्य, विद्यायाश्च प्रमुखकेन्द्रम् आसीत्।

अन्ते असावधानतया पादे धनुष्–प्रत्यञ्चाघातेन प्रतापोऽस्वस्थोऽभवत्। 1597 तमे ईस्वीयाब्दे प्रतापः दिवंगतः। प्रतापः महान् सेनानायकः, जननायकः, व्यवस्थापकः, सङ्घटनकर्त्ता च आसीत्। भारतवासिनः अधुनापि तस्य स्वातन्त्र्यप्रेमिणः शौर्यगाथां गायन्ति।

**उत्तरम् :**

**प्रसंग–** प्रस्तुत गद्यांश हमारी पाठ्य–पुस्तक 'स्पन्दना' के 'महाराणा–प्रतापः' शीर्षक पाठ से उद्धृत है। मेवाड़ के राजा महाराणा–प्रताप का मुगल सम्राट् अकबर की सेना से अनवरत युद्ध में धन के अभाव के कारण जब वे विचलित होने लगे तो मेवाड़ के भामाशाह ने अपनी अर्जित विपुल धन–सम्पत्ति देश–रक्षा हेतु प्रताप को समर्पित कर दी थी। प्रस्तुत अंश में भामाशाह द्वारा प्राप्त सम्पत्ति से महाराणा–प्रताप द्वारा सैन्य–शक्ति का संग्रह करने, स्वतन्त्रता–युद्ध करने का, अपने राज्यों को स्वतंत्र कराने का प्रेरणास्पद वर्णन हुआ है।

**हिन्दी अनुवाद–** उससे (भामाशाह के धन से) फिर से सैन्य–शक्ति का संग्रह कार्य प्रारम्भ कर दिया और उन्होंने विशाल सेना की रचना की और उस सेना के द्वारा मुगल–शासक से स्वतंत्रता का युद्ध प्रारम्भ कर दिया। अपने राज्य के अपने हाथ से निकले हुए अनेक भागों को पुनः अपने नियन्त्रण में कर लिया। उनमें मोही, गोगुन्दा, उदयपुर आदि मुख्य थे। अपने राज्य में शान्ति की स्थापना करके 'चावण्ड' नामक स्थान को अपनी राजधानी बनाया। उस समय 'चावण्ड' नामक स्थान स्थापत्य कला का, ललित कला का, व्यापार का और विद्या का प्रमुख केन्द्र था।

सभी विद्यार्थियों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर/डेस्क वर्क प्राप्त करने के लिए 9460377092 को अपनी क्लास के व्हाट्सएप्प ग्रुप में एड करें। आपकी क्लास के व्हाट्सएप्प ग्रुप में पेपर भेज दिए जाएंगे।

अन्त में असावधानी से पैर में धनुष की प्रत्यञ्चा की चोट से प्रताप अस्वस्थ हो गये। सन् 1597 ई. में प्रताप का स्वर्गलोक हो गया। प्रताप महान् सेनापति, जननायक, व्यवस्थापक और संघटनकर्ता थे। भारतवासी आज भी उनकी स्वतन्त्रता प्रिय शौर्य-गाथाओं को गाते हैं।

2. अधोलिखितस्य पद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु- 5

आसीना भव मानस-हंसे
कुन्द-तुहिन-शशि-धवले!
हर जडतां कुरु बोधि-विकासं
सित-पंकज-तनु-विमले!

**उत्तरम् :**

**प्रसंग-** प्रस्तुत पद्य हमारी पाठ्य-पुस्तक 'स्पन्दना' के 'जय सुरभारति!' शीर्षक पाठ से उद्धृत है। मूलतः यह पाठ राजस्थान के सुप्रसिद्ध कवि डॉ. हरिराम आचार्य द्वारा विरचित 'सरस्वती-वन्दना' से संकलित किया गया है। इस पद्य में कवि सरस्वती के स्वरूप एवं गुणों का वर्णन तथा प्रार्थना करते हुए कहता है कि-

**हिन्दी अनुवाद-** चमेली, बर्फ एवं चन्द्रमा के समान श्वेत (सफेद) वर्ण वाली हे सरस्वति! मानसरोवर के हंस पर अथवा मेरे मानस-रूपी हंस पर विराजमान होवो! श्वेतकमल (पुण्डरीक) के समान सुन्दर व पवित्र हे सरस्वति! मेरे अज्ञान को दूर करो तथा ज्ञान का विकास करो।

**अथवा**

2. अधोलिखितस्य पद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु- 5

हिमालयात् समारभ्य यावदिन्दुसरोवरम्।
तं देवनिर्मितं देशं हिन्दुस्थानं प्रचक्षते।।

**उत्तरम् :**

**प्रसंग-** प्रस्तुत पद्य हमारी पाठ्य-पुस्तक 'स्पन्दना' के 'स्वराष्ट्र-गौरवम्' शीर्षक पाठ से उद्धृत है। मूलतः यह पद्य बृहस्पत्यागम से संकलित है। इस पद्य में भारत-देश के अन्य नाम 'हिन्दुस्तान' की भौगोलिक स्थिति का वर्णन करते हुए कवि कहता है कि-

**हिन्दी अनुवाद-** हिमालय से लेकर हिन्द महासागर तक का जो भूभाग है, देवताओं द्वारा निर्मित उस स्थान को हिन्दुस्तान कहा जाता है।

3. अधोलिखितस्य पद्यांशस्य सप्रसंगं संस्कृतव्याख्यां करोतु- 4

उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।
वर्षं तद्भारतं नाम भारती यत्र सन्ततिः।।

**उत्तरम् :**

**प्रसङ्ग-** प्रस्तुतपद्यम् अस्माकं पाठ्यपुस्तकस्य 'स्पन्दनायाः' 'स्वराष्ट्र-गौरवम्' इति शीर्षकपाठाद् उद्धृतम्। मूलतः पद्यमिदं विष्णुपुराणातः संकलितम्। अस्मिन् पद्ये भारतदेशस्य भौगोलिकं स्थितिं वर्णयन् कविः कथयति यत्-

**संस्कृत-व्याख्या-** सागरस्य यः उत्तरस्यां दिशि हिमालयस्य च दक्षिणस्यां दिशि भूभागः वर्तते, सैव भागः भारतदेशः कथ्यते। अस्मिन् भारतदेशे भारतीयाः नाम सरस्वती-पुत्राः निवसन्ति। अर्थात् भारतदेशे ये वसन्ति ते भारतीयाः कथ्यन्ते।

**विशेषः-** अत्र भारतदेशस्य पौराणिकं महत्त्वं प्रदर्शयन् तस्य विष्णुपुराणानुसारेण भौगोलिकस्वरूपं दर्शितम्।

**अथवा**

3. अधोलिखितस्य पद्यांशस्य सप्रसंगं संस्कृतव्याख्यां करोतु- 4

प्रियवाक्य-प्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्मात्तदेव वक्तव्यं वचने का दरिद्रता।।

**उत्तरम् :**

**प्रसङ्ग-** प्रस्तुतपद्यम् अस्माकं पाठ्यपुस्तकस्य 'स्पन्दनायाः' 'सुभाषित-रत्नानि' इतिशीर्षकपाठाद् उद्धृतः। अस्मिन् पद्ये प्रियवाक्यकथनस्य महत्त्वं वर्णितम्।

**संस्कृत-व्याख्या-** प्रियवचनस्य महत्त्वं प्रदर्शयन् कविः कथयति यत् मधुरवाक्य-भाषणेन सर्वेऽपि प्राणिनः सन्तोषं प्राप्नुवन्ति। अत एव तादृशं मधुरवाक्यमेव वदनीयम्। मधुरवाक्यभाषणे तु कृपणता न कर्त्तव्या।

**विशेषः-** वस्तुतः मधुरभाषणेन सर्वे जनाः प्रसन्नाः भवन्ति। अतः कदापि कटुवाक्यं न कथनीयम्।

4. अधोलिखितस्य नाट्यांशस्य सप्रसंगं संस्कृतव्याख्यां करोतु- 3

**राजा** - (सहर्षम् आत्मगतम्) कथमिव सम्पूर्णमपि मे मनोरथं नाभिनन्दामि? (इति बालं परिष्वजते।)

**बालः** - मुञ्च माम्। यावन्मातुः सकाशं गमिष्यामि।

**राजा** - पुत्रक, मया सहैव मातरमभिनन्दिष्यसि।

**बालः** - मम खलु तातो दुष्यन्तः। न त्वम्।

**राजा** - (सस्मितम्) एष विवाद एव प्रत्याययति।

**उत्तरम् :**

**प्रसङ्ग-** प्रस्तुतनाट्यांशः अस्माकं पाठ्यपुस्तकस्य 'स्पन्दनायाः' 'जृम्भस्व सिंह! दन्तांस्ते गणयिष्ये' इतिशीर्षकपाठाद् उद्धृतः। मूलतः पाठोऽयम् 'अभिज्ञानशाकुन्तलम्' इति नाटकस्य सप्तमांकात् संकलितः। अंशेऽस्मिन् नृपस्य दुष्यन्तस्य तापसीभ्यां सह वार्तालापस्य तथा स्वपुत्रेण सह मिलनस्य रम्यं वर्णनं वर्तते।

**संस्कृत-व्याख्या-**

**राजा** - (हर्षपूर्वकम् स्वमनसि) केन प्रकारेण अधुनाऽपि सम्पूर्णमपि मम मनोरथं कथं नहि अभिनन्दनं करोमि? (इति कथयित्वा बालकस्य आलिङ्गनं करोति)

**बालकः** - त्यज् माम्। अहम् अधुना मातुः समीपं यास्यामि।

**राजा** - पुत्र! मया साकमेव जननीम् अभिनन्दनं करिष्यसि।

**बालकः** - निश्चयेन मम पिता तु दुष्यन्तः वर्तते, भवान् नास्ति।

**राजा** - (मन्दहासपूर्वकम्) अयं विवादः एव विश्वासमुत्पादयति।

**विशेषः-** अत्र कविना पिता-पुत्रयोः मेलनस्य अतीव रमणीयं चित्रणं कृतम्। नाटकीयघटनाचक्रेण कविना सुस्पष्टं कृतं यत् सः बालकः दुष्यन्तस्यैव पुत्रः वर्तते।

**अथवा**

4. अधोलिखितस्य नाट्यांशस्य सप्रसंगं संस्कृतव्याख्यां करोतु- 3

**सर्वदारः** - (तथा निपुणं निरीक्षमाणः) महाराज! मेवाड़मन्त्री भामाशाहः इव कश्चन आगच्छन् प्रतीयते।

**प्रतापः** - हुँ, किम् उक्तम्! भामाशाहः? तस्य कथम् इदं ज्ञातम् अभूत्? अस्तु तावत्, प्रतीक्षामहे तम्। (भामाशाहः धनराशिग्रन्थिम् आदाय आयाति)

**भामाशाहः** - (प्रणम्य) अन्नदातः! सेवकं सन्त्यज्य क्व प्रस्थीयते श्रीमता?

सभी गुरूजनों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर प्राप्त करने के लिए 9460377092 पर सिर्फ TEACHER शब्द SMS करें (व्हाट्सएप्प ना करें) आपसे संपर्क कर आपको विशेष रूप से मॉडल पेपर भेजे जाएंगे।

**प्रतापः** – (दीर्घं निःश्वस्य) न क्व अपि बन्धो! गन्तुं शक्यम् अपि तु न। पार्श्वे धनं नैव, न च सेना एव। अहं स्वदेशं कथं रक्षेयम्? अस्माद् एव मनः दोलायितम् अस्ति।

**उत्तरम् :**

**प्रसङ्ग–** प्रस्तुतनाट्यांशः अस्माकं पाठ्यपुस्तकस्य 'स्पन्दनायाः' 'स्वदेशं कथं रक्षेयम्' इतिशीर्षकपाठाद् उद्धृतः। पाठोऽयं डॉ. नारायणशास्त्री कांकरेण विरचिता एकांकी वर्तते।

प्रस्तुतांशे यदा धनाभावे सैन्यशक्त्याभावे च खिन्नः प्रतापः स्वदेशं परित्युक्तुं समुद्यतः भवति, तदैव मेवाड़मंत्री भामाशाहः तत्रागत्य स्वकीयां विपुलां धनराशिं देशस्य स्वतन्त्रतायै प्रतापं समर्पयतीति वर्णितम्।

**संस्कृत–व्याख्या–**

**सर्वदारः** – (तथैव सम्यक्तया अवलोकयन्) हे महाराज! मेवाड़राज्यस्य अमात्यः भामाशाहः सदृशः कोऽपि आगच्छन् दृश्यते।

**प्रतापः** – हुँ, किम् कथितम्! भामाशाहः? सः इदं समाचारं कथं ज्ञातवान्? भवतु तावत्, वयमत्रैव तस्य प्रतीक्षां कुर्मः।

**भामाशाहः** – (प्रणामं कृत्वा) हे अन्नदातः! अनुचरं मां परित्यज्य श्रीमान् कुत्र प्रस्थानं करोति?

**प्रतापः** – (दीर्घं निःश्वासं त्यक्त्वा) न कुत्रापि बन्धो! अहं कुत्रापि गन्तुं न शक्नोमि मम समीपे न तु धनं वर्तते, न च सेना वर्तते। स्वराष्ट्रस्य रक्षां कथं करवाणि? अस्मात् कारणादेव मम हृदयः कम्पितः वर्तते।

**5.** अधोलिखितेषु प्रश्नेषु केषांचन षट् प्रश्नानामुत्तराणि संस्कृतमाध्यमेन लिखतु– 3

1. 'संघे शक्तिः' इति पाठः कस्मात् ग्रन्थात् गृहीतः?
2. अस्माभिः मनसा किं स्मरणीयम्?
3. शास्त्रचर्चा कदा प्रवर्तते?
4. सर्वदमनेन 'शकुन्तलावण्य' पदस्य किमर्थं गृहीतम्?
5. जले शवं पतितं दृष्ट्वा शृगालाः कस्मात् रुदन्ति?
6. 'लोकहितं मम करणीयम्' इति केन वदनीयम्?
7. परतन्त्र भारते कृषक–वर्गः कतिधा दासता–पञ्जरे आबद्धः आसीत्?
8. 'भारतवसुधाम्' इत्यस्य पञ्चविशेषणानि कानिचन लिख्यन्ताम्।

**उत्तरम् :**

1. 'संघे शक्तिः' इति पाठः हितोपदेशः इति कथाग्रन्थात् गृहीतः।
2. अस्माभिः मनसा सततं स्मरणीयं यत् लोकहितं मम करणीयम्।
3. यदा राष्ट्रं शस्त्रेण सुरक्षितं भवति तदा शास्त्रचर्चा प्रवर्तते।
4. 'शकुन्तलायाः' लावण्यं इति अर्थं गृहीतवान्।
5. यतः शृगालाः जले पतितं शवं न खादितुं शक्नुवन्ति।
6. 'लोकहितं मम करणीयम्' इति वचसा वदनीयम्।
7. परतन्त्रभारते कृषक–वर्गः त्रिविधे–दासता पञ्जरे आबद्धः आसीत्।
8. 'भारतवसुधाम्' इत्यस्य पञ्चविशेषणानि सन्ति–
   (क) मुनिजनदैवेरनिशं पूज्या।
   (ख) भगवल्लीला धाममयी।
   (ग) अध्यात्मधरित्री।
   (घ) शान्तिवहां।
   (ड़) सस्यश्यामलां।

**निर्देशः प्रश्न संख्या 6–9 पर्यन्तं रेखांकितपदमाधृत्य प्रश्ननिर्माणं करोतु–**

**6.** ततः प्रविशति तपस्विनीभ्यां सह बालः। 1

**उत्तरम् :**

ततः काभ्यां सह बालः प्रविशति?

**7.** हिमालयाद् समारभ्य इन्दुसरोवरं यावत्। 1

**उत्तरम् :**

कस्माद् समारभ्य इन्दुसरोवरं यावत्?

**8.** कपोतराजः तण्डुललुब्धान् कपोतान् प्रति आह। 1

**उत्तरम् :**

कपोतराजः कीदृशान् कपोतान् प्रति आह?

**9.** अल्पानां वस्तूनाम अपि संहतिः कार्यसाधिका। 1

**उत्तरम् :**

केषां संहतिः कार्यसाधिका?

**10.** प्रश्नपत्रादतिरिच्य स्वपाठ्यपुस्तकात् श्लोकद्वयं लिखतु। 3

**उत्तरम् :**

1. पात्रापात्र–विवेकोऽस्ति धेनुपन्नगयोः इव।
   तृणात्संजायते क्षीरं क्षीरात्संजायते विषम्।।
2. यथा खनन् खनित्रेण नरो वार्यधिगच्छति।
   तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति।।

**11.** अधोलिखितं गद्यांशं पठित्वा एतदाधारित प्रश्नानाम् उत्तराणि यथानिर्देशं लिखतु–

अस्मिन् संसारे न कोऽपि देशो प्रान्तो वा विद्यते यत्रत्याः जनाः कालिदासं न विंदन्ति। भारतीयेषु कविषु, कालिदास एव भूयसी कीर्तिमलभत। आनन्दवर्धनाचार्यः कालिदासं महाकविमाह। प्रसन्नराघवस्य कर्त्ता जयदेवस्तं 'कविकुल गुरुः कालिदासो विलासः' अकथयत्। कविकुलगुरुर्महाकविकालिदासः संस्कृत–साहित्यस्य अद्यावधि कनिष्ठिकाधिष्ठितः कविरस्ति।

कालिदासविरचित–ग्रन्थेषु रघुवंश कुमारसंभवञ्चेति द्वे महाकाव्ये, मेघदूत ऋतुसंहारमिति खण्डकाव्यद्वयम्। मालविकाग्निमित्रं विक्रमोर्वशीयं अभिज्ञानशाकुन्तलादीनि त्रीणि नाटकानि। एषु ग्रन्थेषु रघुवंशमहाकाव्यं यथा चरित्र वर्णनदृष्ट्या गौरवान्वितं स्वीक्रियते, तथैव अभिज्ञानशाकुन्तलं नाम नाटकं समस्तेऽपि नाट्य साहित्ये सर्वोत्कृष्टं स्थानं लभते। कालिदासस्य समग्रसाहित्यं प्रसादगुणवैदर्भीरीत्या संवलितं वर्तते। उपमा क्षेत्रे तु कालिदासः अद्वितीयः कविरस्ति। संस्कृतसाहित्ये 'उपमा कालिदासस्य' इत्युक्तिः प्रसिद्धा वर्तते।

1. अस्य गद्यांशस्य समुचितं शीर्षकं लिखतु। 1
2. यथानिर्देशं प्रश्नान् उत्तरतु–
   (क) संस्कृतसाहित्यस्य कनिष्ठिकाधिष्ठित कविः कः? 1
   (ख) कस्मिन् क्षेत्रे कालिदासः अद्वितीयः कविरस्ति? 1
   (ग) कालिदासं महाकविं कः आह? 1
   (घ) 'कविकुलगुरुः कालिदासो विलासः' इति कः अकथयत्? 1
   (ड़) कालिदासविरचितखण्डकाव्यस्य नाम लिखत। 1
3. यथानिर्देशं प्रश्नान् उत्तरतु–

सभी विद्यार्थियों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर/डेस्क वर्क प्राप्त करने के लिए 9460377092 को अपनी क्लास के व्हाट्सएप्प ग्रुप में एड करें। आपकी क्लास के व्हाट्सएप्प ग्रुप में पेपर भेज दिए जाएंगे।

(क) "यत्रत्याः जनाः कालिदासं न ..........।"अत्र समुचितं क्रियापदं किमस्ति? 1

(ख) 'द्वे महाकाव्ये'–इत्यत्र विशेषणपदं किम्? 1

(ग) "कालिदास एव भूयसी कीर्तिमलभत।" अस्मिन् वाक्ये कर्तृपदं किम् प्रयुक्तम्? 1

(घ) अस्मिन गद्यांशे 'द्वितीयः' पदस्य विलोमपदं किं प्रयुक्तम्? 1

**उत्तरम् :**

1. महाकविः कालिदासः।
2. (क) महाकविकालिदासः।
   (ख) उपमाक्षेत्रे।
   (ग) आनन्दवर्धनाचार्यः कालिदासं महाकविमाह।
   (घ) इति प्रसन्नराघवस्य कर्ता जयदेवः अकथयत्।
   (ङ) मेघदूतम्, ऋतुसंहारञ्च।
3. (क) विन्दन्ति।
   (ख) द्वे।
   (ग) कालिदासः।
   (घ) अद्वितीयः।

**12.** अधोलिखितपदयोः सन्धिविच्छेदं कृत्वा सन्धेः नामापि लिखतु।

1. इत्यपि 1
2. हरये 1

**उत्तरम् :**

1. इति + अपि (यण् सन्धिः)
2. हरे + ए (अयादि सन्धिः)

**13.** अधोलिखितपदयोः सन्धिं कृत्वा सन्धेः नामापि लिखतु।

1. नदी + ईशः 1
2. सदा + एव 1

**उत्तरम् :**

1. नदीशः (दीर्घ सन्धि)
2. सदैव (वृद्धि सन्धि)

**14.** अधोलिखितरेखांकित पदेषु समस्तपदानां विग्रहम् अथवा विग्रहपदानां समासं कृत्वा समासस्य नामापि लिखतु–

1. अहं शक्तिम् अनतिक्रम्य परिश्रमं करोमि। 1
2. मह्यं नीलं कमलं रोचते। 1
3. पाणी च पादौ च शैत्येन रक्षणीयम्। 1

**उत्तरम् :**

1. यथाशक्ति, अव्ययीभावसमासः।
2. नीलकमलम्, कर्मधारयसमासः।
3. पाणिपादम्, द्वन्द्वसमासः।

**15.** अधोलिखितरेखांकित पदेषु विभक्तिं तत् कारणं च लिखतु–

1. अध्यापकम् अभितः छात्राः तिष्ठन्ति। 1
2. सः मया सह गृहं गच्छति। 1
3. अध्यापकः छात्राय क्रुध्यति। 1

**उत्तरम् :**

1. द्वितीया, 'अभितः' योगे।
2. तृतीया, 'सह' योगे।
3. चतुर्थी, 'क्रुध्' योगे।

**16.** कोष्ठकेषु प्रदत्त–प्रकृतिप्रत्ययानुसारं शब्दनिर्माणं कृत्वा रिक्तस्थानानि पूरयित्वा लिखतु।

1. बालकः ......... पश्यति। (हस् + शतृ) 1
2. अस्माभिः सदाचारः .......... । (पाल् + अनीयर्) 1

**उत्तरम् :**

1. बालकः हसन् पश्यति।
2. अस्माभिः सदाचारः पालनीयः।

**17.** अधोलिखितवाक्ययोः रेखांकितपदेषु प्रकृतिं प्रत्ययं च पृथककृत्वा लिखतु।

1. तेन कथा पठनीया। 1
2. सा तस्य आत्मजा अस्ति। 1

**उत्तरम् :**

1. पठ् + अनीयर्।
2. आत्मज + टाप्।

**18.** मंजूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा लिखतु–

| अपि, विना, मा, ह्यः |
|---|

1. छात्राः ......... वनभोजाय अगच्छन्। 1
2. धर्मेण ......... धनं न भवति। 1
3. असत्यं कदापि .......... वद। 1

**उत्तरम् :**

1. छात्राः ह्यः वनभोजाय अगच्छन्।
2. धर्मेण विना धनं न भवति।
3. असत्यं कदापि मा वद।

**प्रश्नसंख्या 19–21 पर्यन्तं अधोलिखितवाक्यानां वाच्यपरिवर्तनं कृत्वा लिखतु–**

**19.** रामः पुस्तकं पठति। 1

**उत्तरम् :**

रामेण पुस्तकं पठ्यते।

**20.** अहं गृहं गच्छामि। 1

**उत्तरम् :**

मया गृहं गम्यते।

**21.** सः प्रतिदिनं पुस्तकं पठति। 1

**उत्तरम् :**

तेन प्रतिदिनं पुस्तकं पठ्यते।

सभी गुरुजनों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर प्राप्त करने के लिए 9460377092 पर सिर्फ TEACHER शब्द SMS करें (व्हाट्सएप्प ना करें) आपसे संपर्क कर आपको विशेष रूप से मॉडल पेपर भेजे जाएंगे।

**22.** घटिका चित्रसहायतया अंकानां स्थाने संस्कृतशब्देषु समयलेखनं करोतु–







1. अहं प्रातः ........... उत्तिष्ठामि। 1
2. अविनाशः .......... अल्पाहारं करोति। 1

**उत्तरम् :**

1. अहं प्रातः पंचवादने उत्तिष्ठामि।
2. अविनाशः सार्धसप्तवादने अल्पाहारं करोति।

**23.** अधोलिखितं वाक्यत्रयं शुद्धं कृत्वा लिखतु–

1. बालकाः पुस्तकं पठति। 1
2. अहं फलं खादामः। 1
3. सिंहः वने वसन्ति। 1

**उत्तरम् :**

1. बालकः पुस्तकं पठति।
2. वयं फलं खादामः।
3. सिंहः वने वसति।

**24.** भवति आशा। भवत्याः राजकीय–आदर्श–उच्चमाध्यमिक–विद्यालये स्वच्छतादिवसः समायोजितः आसीत्। विषयेस्मिन् एक पत्रं स्वमित्रं प्रति लिखत। 4

**उत्तरम् :**

राजकीय–उच्च–माध्यमिक विद्यालयः
जयपुरम्
दिनांकः 15–09–20....

प्रिये स्मिते
सादरं वन्दे।
अत्र सर्वगतं कुशलम् अस्ति। भवती अपि तत्र कुशलिनी इत्यहं मन्ये। अद्य चिरात् प्राप्तं भवत्याः स्नेहसिक्तं पत्रम्। भवती मम विद्यालये समायोजितः स्वच्छतादिवसस्य विषये ज्ञातुम् इच्छति।

सखि! गत सप्ताहे अस्माकं विद्यालये स्वच्छतादिवसः समायोजितः आसीत्। अस्मिन् अवसरे अस्माकं प्रधानाचार्यः उद्बोधितवान्। सः उक्तवान् यद् अस्माकं गृहस्य स्वच्छता तु करणीयाएव सार्वजनिक–स्थानेषु बसस्थाने, उद्याने, चिकित्सालये अपि स्वच्छतायाः अस्माकं दायित्वं। येन अस्माकं देशः सुन्दरः नागरिकाः च स्वस्था भवन्तु। अस्माकं राष्ट्रपिता महात्मागाँधीः अपि साबरमती आश्रमे स्वयमेव स्वच्छताकार्यं करोति स्म। सः अस्माकं प्रेरणापुरुषः अस्ति। अद्यापि अस्माकं देशे 'स्वच्छता अभियानम्' प्रचलति। पुनश्च वयम् अभियानरूपेण विद्यालये विद्यालयात् बहिः च सार्वजनिकेषु स्थानेषु छात्राणां समूहं निर्माय स्वच्छतां कृतवन्तः। तत्पश्चात् वयं विद्यालये प्रतिज्ञां कृतवन्तः यत् अस्माकं परिवेशं स्वच्छं करिष्यामः। मातापित्रोः चरणयोः मे प्रणत्यः।

भवत्या सखी
आशा

**अथवा**

**24.** भवान् रमेशः। मातरं प्रति अधोलिखितं पत्रं मञ्जूषा–पद सहायतया पूरयत। 4

| |
|---|
| **मञ्जूषा–** वार्षिकोत्सवः, अभिनयम्, मुख्यातिथिः, कुशलम्, अध्ययनम्, पितरम्, भवदीयः, सर्वेभ्यः |

चारूनगरात्
दिनांकः – 21.12.20....

पूजनीयाः मातृचरणाः!
नमोनमः। अत्र .......... तत्रास्तु। मम विद्यालये .......... आसीत्। तत्र अहम् एकम् .......... कृतवान्। मन्त्रिमहोदयः ......... रूपेण आगतवान्। मम ......... सम्यक् चलति। गृहे .......... नमोनमः। अहं ......... प्रणमामि।

................
रमेशः

**उत्तरम् :**

चारूनगरात्
दिनांकः – 21.12.20....

पूजनीयाः मातृचरणाः!
नमोनमः। अत्र कुशलम् तत्रास्तु। मम विद्यालये वार्षिकोत्सवः आसीत्। तत्र अहम् एकम् अभिनयम् कृतवान्। मन्त्रिमहोदयः मुख्यातिथिः रूपेण आगतवान्। मम अध्ययनम् सम्यक् चलति। गृहे सर्वेभ्यः नमोनमः। अहं पितरम् प्रणमामि।

भवदीयः
रमेशः

**25.** मञ्जूषातः उचितानि पदानि चित्वा अधोलिखितं संवादं पूरयत। 4

| |
|---|
| **मञ्जूषा–** कौ, मातः, पितामहः, भ्राता, जनकः, लवकुशौ, भीष्मः, पुत्रौ, अभिमन्युः। |

**पुत्री** – मातः, अभिमन्युः कः आसीत्?
**माता** – ......... अर्जुनस्य पुत्रः आसीत्।
**पुत्री** – .......... कः आसीत्?
**माता** – भीष्मः कौरवानां पाण्डवानां च ......... आसीत्।
**पुत्री** – पितामहः कः भवति?
**माता** – जनकस्य ......... पितामहः भवति।
**पुत्री** – ........., किम् श्री आर्यवीरः तव भ्राता?
**माता** – आम्, मम ......... तव मातुलः।
**पुत्री** – लवकुशौ रामस्य ......... आस्ताम्?
**माता** – ......... रामस्य ......... आस्ताम्।

**उत्तरम् :**

**पुत्री** – मातः, अभिमन्युः कः आसीत्?
**माता** – अभिमन्युः अर्जुनस्य पुत्रः आसीत्।
**पुत्री** – भीष्मः कः आसीत्?
**माता** – भीष्मः कौरवानां पाण्डवानां च पितामहः आसीत्।
**पुत्री** – पितामहः कः भवति?

सभी विद्यार्थियों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर/डेस्क वर्क प्राप्त करने के लिए 9460377092 को अपनी क्लास के व्हाट्सएप्प ग्रुप में एड करें। आपकी क्लास के व्हाट्सएप्प ग्रुप में पेपर भेज दिए जाएंगे।

**माता** – जनकस्य जनकः पितामहः भवति।
**पुत्री** – मातः, किम् श्री आर्यवीरः तव भ्राता?
**माता** – आम्, मम भ्राता तव मातुलः।
**पुत्री** – लवकुशौ रामस्य कौ आस्ताम्?
**माता** – लवकुशौ रामस्य पुत्रौ आस्ताम्।

**26.** अधोलिखितषड् वाक्येषु केषांचन चतुर्णां वाक्यानां संस्कृतभाषया अनुवादं करोतु– 4

1. वह दूध पीता है।
2. विनीत पुस्तक पढ़ता है।
3. हिरन वन में दौड़ते हैं।
4. मुनि वन में निवास करते हैं।
5. गाँव के दोनों ओर सड़क है।
6. वे दोनों बाग में खेलते हैं।

**उत्तरम् :**

1. सः दुग्धं पिबति।
2. विनीतः पुस्तकं पठति।
3. मृगाः वनं धावन्ति।
4. मुनयः वने निवसन्ति।
5. ग्रामम् उभयतः राजमार्गम् अस्ति।
6. तौ उद्याने क्रीडतः।

**27.** अधः चित्रं दृष्ट्वा मंजूषायां प्रदत्त शब्दानां सहायतया संस्कृते षड् वाक्यानि रचयतु– 3



| **मञ्जूषा–** स्वस्य विद्यालये, सहयोगेनैव, स्वच्छताभियानं, प्रेरयन्ति, स्वच्छताकार्यम्, सार्वजनिकस्थलस्य। |
|---|

**उत्तरम् :**

1. चित्रे बालिकाः अध्यापकाश्च स्वच्छताकार्यं कुर्वन्ति।
2. अधुना भारतदेशे सर्वत्र स्वच्छताभियानं प्रचलति।
3. विद्यालयेषु शिक्षकाः छात्रान् प्रेरयन्ति।
4. छात्राणां समूहः स्वस्य विद्यालये स्वच्छतां करोति।
5. अत्र अनेकाः बालिकाः शिक्षकाः च सार्वजनिकस्थलस्य स्वच्छतां कुर्वन्ति।
6. सर्वेषां सहयोगेनैव सर्वत्र स्वच्छता भवितुं शक्नोति।

**अथवा**

**27.** अधोलिखितम् अनुच्छेदं मञ्जूषायाः सहायतया पूरयित्वा लिखतु– 3

| **मञ्जूषा–** अध्यापकाः, उद्यानपालकः, विज्ञान–प्रयोगशालाः, योग्याः, भवनम्, पुस्तकालयः दिल्ली–नगरे, सुन्दराणि। |
|---|

मम विद्यालयः .......... अस्ति। विद्यालयस्य .......... विशालम्। अत्र द्वादश श्रेण्यः सन्ति। .......... छात्रान्। स्नेहेन पाठयन्ति। छात्राः अपि .......... सन्ति। विद्यालये विशालः .........., विस्तृतम् क्रीडाक्षेत्रम्, नृत्य–संगीत–शाला .......... चापि सन्ति। विद्यालयस्य पुरतः रम्यम् उद्यानम् अस्ति। अत्र .......... पुष्पाणि विकसन्ति। .......... अत्र परिश्रमेण कार्यं करोति।

**उत्तरम् :**

मम विद्यालयः दिल्ली–नगरे अस्ति। विद्यालयस्य भवनम् विशालम्। अत्र द्वादश श्रेण्यः सन्ति। अध्यापकाः छात्रान्। स्नेहेन पाठयन्ति। छात्राः अपि योग्याः सन्ति। विद्यालये विशालः पुस्तकालयः, विस्तृतम् क्रीडाक्षेत्रम्, नृत्य–संगीत–शाला विज्ञान–प्रयोगशाला चापि सन्ति। विद्यालयस्य पुरतः रम्यम् उद्यानम् अस्ति। अत्र सुन्दराणि पुष्पाणि विकसन्ति। उद्यानपालकः अत्र परिश्रमेण कार्यं करोति।

**28.** अधोलिखितवाक्यानि क्रमरहितानि सन्ति। यथाक्रमं संयोजनं कृत्वा लिखतु। 3

1. सः जलं पातुं स्नातुं च प्रतिदिनम् सरितः तटम् अगच्छत्।
2. एकदा सौचिकस्य पुत्रः गजस्य करे सूचिकाम् अभिनत्।
3. क्रुद्धः सन् गजः सरितः तटम् अगच्छत्। तत्र स्नात्वा जलं च पीत्वा स्वकरे पंकिलं जलम् आनयत्।
4. तदा सौचिकस्य पुत्रः आत्मग्लानिम् अनुभूय अति खिन्नः अभवत्।
5. सौचिकस्य आपणे स्यूतेषु वस्त्रेषु असिंचत्।
6. एकः गजः आसीत्।

**उत्तरम् :**

1. एकः गजः आसीत्।
2. सः जलं पातुं स्नातुं च प्रतिदिनम् सरितः तटम् अगच्छत्।
3. एकदा सौचिकस्य पुत्रः गजस्य करे सूचिकाम् अभिनत्।
4. क्रुद्धः सन् गजः सरितः तटम् अगच्छत्। तत्र स्नात्वा जलं च पीत्वा स्वकरे पंकिलं जलम् आनयत्।
5. सौचिकस्य आपणे स्यूतेषु वस्त्रेषु असिंचत्।
6. तदा सौचिकस्य पुत्रः आत्मग्लानिम् अनुभूय अति खिन्नः अभवत्।

□□□□□□□

सभी गुरुजनों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर प्राप्त करने के लिए 9460377092 पर सिर्फ TEACHER शब्द SMS करें (व्हाट्सएप्प ना करें) आपसे संपर्क कर आपको विशेष रूप से मॉडल पेपर भेजे जाएंगे।